**DAV PUBLIC SCHOOLS, BHUBANESWAR**
**PERIODIC ASSESSMENT-I(2022-23)**

- Please check that this question contains **04** pages.
- Check that this question paper contains **11** questions.
- Please write down the serial Number of the question in the left side of the margin before attempting it.
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed 15 minutes prior to the commencement of the examination. The students will read the question paper only and will not write any answer on the answer script during this period.

**CLASS-IX**
**SUB : COMMUNICATIVE SANSKRIT**

**Time Allowed:1½ Hours** **Maximum Marks : 40**

सामान्यनिर्देशाः

**1.** कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
**2.** प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
**3.** उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
**4.** प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
**5.** सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
**6.** प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

प्रश्नपत्रस्वरूपम् -

| | | | |
|---|---|---|---|
| 'क' भागः | : | अपठितावबोधनम् | 5 अङ्काः |
| 'ख' भागः | : | रचनात्मककार्यम् | 5 अङ्काः |
| 'ग' भागः | : | अनुप्रयुक्तव्याकरणम् | 15 अङ्काः |
| 'घ' भागः | : | पठितावबोधनम् | 15 अङ्काः |

क- भागः
अपठितावबोधनम्(5 अङ्काः)

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत । **(5)**

रथयात्रा अस्माकं देशस्य एकः प्रमुखः उत्सवः भवति । अयं उत्सवः प्रमुखरूपेण ओडिशा-राज्यस्य पुरीजिल्लायां पालनं भवति । एषा यात्रा जगन्नाथेन सह सम्बन्धितः अस्ति । पुरी इत्यस्य रथयात्रा न केवलम् ओडिशायाम् अपितु समग्रे विश्वे प्रसिद्धा अस्ति । आषाढशुक्लस्य द्वितीये दिने एषा यात्रा भवति । अस्याः अन्यानि नामानि यथा-घोषयात्रा, नवदीनात्मिका यात्रा, गुण्डीचा यात्रा च इति । अस्यां यात्रायां भगवान् जगन्नाथः पतितानां कृते स्वगृहात् आगत्य दर्शनं दत्त्वा तेषां मनसः कामनां पूरणं करोति ।

**I.**एकपदेन उत्तरत। **(½x2=1)**

**(i)** रथयात्रा केन सह सम्बन्धितः अस्ति ?

**(ii)** कस्य द्वितीये दिने एषा यात्रा भवति ?

**II.**पूर्णवाक्येन उत्तरत। **(1x1=1)**

रथयात्रायाः कानि अन्यानि नामानि सन्ति ?

**III.** प्रदत्तानुच्छेदस्य कृते समुचितं शीर्षकं लिखत। **(1x1=1)**

**IV.** प्रदत्तानुच्छेदतः समुचितम् उत्तरं चित्वा प्रश्नान् उत्तरत। **(1x2=2)**

**(i)** " प्रमुखः "इति विशेषणपदस्य **विशेष्यपदं** गद्यांशे किम् अस्ति ?

(क)उत्सवः (ख)एकः (ग)मूलतः

**(ii)** " इच्छां " इति पदस्य **पर्यायपदं** गद्यांशे किम् अस्ति ?

(क)ओडिशायाम् (ख)प्रसिद्धाम् (ग)कामनाम्

## ख- भागः

## रचनात्मकं कार्यम्(5 अङ्काः)

**2.** भवान् इशानः। स्वनगरस्य वर्णनं कृत्वा मित्रम् प्रति पत्रं लिखति। मञ्जुषाप्रदत्त-पदैः सह पत्रं पुनः लिखतु। **(½x10=5)**

स्थानम्-………..

तिथिः -………..

प्रिय (i)………..!

नमस्ते।

अत्र सर्वं (ii)………., तत्रापि अस्तु।अस्मिन् पत्रे अहम् मम (iii) ………...वर्णनं करोमि। भूवनेश्वरनगरम् अतीव (iv)……….. नगरम् अस्ति । इदं नगरं अस्माकं राज्यस्य(v)………....अस्ति । अत्र बहुसुन्दराणि (vi)……….सन्ति। पर्यटनक्षेत्रे इदं नगरं(vii)………..... भवति।प्रतिवर्षं बहवः पर्यटकाः अत्र भ्रमणाय (viii)……….... । त्वम् अपि अत्र भ्रमणाय आगच्छ। (ix)……… मिलित्वा भ्रमणं करिष्यावः। भवतः पितरौ मम(x)……… ज्ञापयतु।

इति

भवदीयंमित्रम्

इशानः

| |
|---|
| प्रणामं , उद्यानानि , प्रसिद्धं , सुन्दरं , आगच्छन्ति, मित्र , नगरस्य , आवां , राजधानी , कुशलम् |

## ग- भागः

## अनुप्रयुक्तव्याकरणम्(15 अङ्काः)

**3.** निर्देशानुसारम् उत्तरत। **(½x2=1)**

**(i)** त् , क् , प् , र् , च् – एतेषु वर्णेषु कः वर्णः **कण्ठ्य** अस्ति ?

**(ii)** ' स् ' इति वर्णस्य उच्चारणस्थानम् किम् अस्ति ?

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत। **(1x3=3)**

**(i)** काष्ठादग्निः जायते।

**(ii)**अथ ब्राह्मणः राज्ञा श्राद्ध + अर्थम् निमन्त्रितः।

**(iii)**एषा कथा हित +उपदेशात् गृहीता।

**5.** प्रदत्तविकल्पेभ्यः उचितशब्दरूपैः रिक्तस्थानानि पूरयत। **(1x4=4)**

**(i)**....................नाम किम् अस्ति ?

(क)बालके (ख)बालकः (ग)बालकस्य

**(ii)**................. गृहं गमिष्यामि।

(क)अहं (ख)मम (ग)मया

**(iii)** वृक्षे ............. सन्ति।

(क)फलम् (ख)फलानि (ग)फलाः

**(iv)**............... कालिदासः श्रेष्ठः अस्ति।

(क)कविना (ख)कविशु (ग)कविषु

**6.** प्रदत्तविकल्पेभ्यः उचितधातुरूपैः रिक्तस्थानानि पूरयत। **(1x4=4)**

**(i)** अहं शिक्षकः ................. ।

(क)भविष्यामि (ख)भविष्यति (ग) भवति

**(ii)** मम मित्रं पुस्तकं ...................।

(क)नयेताम् (ख)नय (ग)नयति

**(iii)** छात्रः शिक्षकं ............. ।

(क)नमेः (ख)नमतु (ग)नमेताम्

**(iv)** ब्राह्मणः परं विषादम् ............. ।

(क)अगच्छति (ख)अगच्छः (ग)अगच्छत्

**7.** मञ्जूषातः समुचित-अव्ययपदैः शून्यस्थानं पूरयत। **(1x3=3)**

**(i)** ग्रीष्मकाले……….. जलं न विद्यते।

**(ii)** मार्गस्य.......... वृक्षाः सन्ति।

**(iii)** सः यत्र अस्ति अहं .......... गच्छामि।

| तत्र , सर्वत्र, उभयत्र |
|---|

## पठितावबोधनम् (15 अङ्काः)

**8.**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। **(5)**

अस्ति उज्जयिन्यां माधवः नाम विप्रः। एकदा तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य स्नातुं गता। अथ ब्राह्मणः राज्ञा श्राद्धार्थं निमन्त्रितः। ब्राह्मणः सहजदारिद्र्यात् अचिन्तयत्- यदि सत्वरं न गच्छामि तर्हि अन्यः कश्चित् श्राद्धार्थं वृतः भवेत्।

**I.**एकपदेन उत्तरत। **(½x 2 =1)**

**(i)** केन श्राद्धार्थं निमन्त्रितः?

**(ii)** विप्रस्य नाम किम् आसीत् ?

**II.**पूर्णवाक्येन उत्तरत। **(1 x 2=2)**

**(i)** ब्राह्मणः सहजदारिद्र्यात् किम् अचिन्तयत् ?

**(ii)** एकदा विप्रस्य भार्या किमर्थं विप्रम् अवस्थाप्य स्नातुं गता ?

**III.**प्रदत्तानुच्छेदतः समुचितम् उत्तरं चित्वा प्रश्नान् उत्तरत। **(1 x 2=2)**

**(i)** 'अस्ति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

**(ii)** ' ब्राह्मणः सहजदारिद्र्यात् अचिन्तयत् ' अत्र क्रियापदं किम् अस्ति ?

**9.**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। **(5)**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥

**I.**एकपदेन उत्तरत। **(½x 2=1)**

**(i)** कुत्र रत्नानि सन्ति ?

**(ii)** रत्नानि कति सन्ति ?

**II.**पूर्णवाक्येन उत्तरत। **(1 x 2=2)**

**(i)** रत्नानि कानि सन्ति ?

**(ii)** मूढैः कुत्र रत्नसंज्ञा विधीयते ?

**III.** प्रदत्तानुच्छेदतः समुचितम् उत्तरं चित्वा प्रश्नान् उत्तरत। **(1 x 2=2)**

**(i)** 'सुवचनम् ' इति पदस्य **पर्यायपदं** किं श्लोके प्रदत्तम् ?

**(ii)** 'पण्डितैः' इति पदस्य **विलोमपदं** श्लोके किम् अस्ति ?

**10.**मञ्जुषातः समुचितानि पदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत। **(½x 4=2)**

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम्॥

**अन्वयः**- सद्भिः तु **(i)** ........... प्रोक्तम् **(ii)** ............. अक्षरम् ।**(iii)** ............. शपथेन अपि जले**(iv)** ............ अक्षरम्।

| शिलालिखितम् , असद्भिः , लिखितम् , लीलया |
|---|

**11.** अधोदत्तवाक्येषु रेखाङ्कतपदानां प्रसङ्गानुसारम् विकल्पेभ्यः अर्थचयनम् कुरुत।**(1x 3 =3)**

**(i)** <u>इदानीं</u> वद।

(क)कदा (ख)अद्य (ग) अधुना

**(ii)** <u>तरवः</u> नम्राः भवन्ति।

(क)जनाः (ख)वृक्षाः (ग)लताः

**(iii)** <u>वित्तस्य</u> विभूषणं पात्रे व्ययः अस्ति।

(क)धनस्य (ख)परिमाणस्य (ग)जलस्य

****